CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library

S.D.P.B.

Coll. No. 707

Title Nārāyaṇa bali

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No. : 707 Subject : Paranic lit

Title : Nārāyaṇa bali.

Author : — Scribe : Ananta.

Date of the work : — Date of the Ms. : V.S. १९४८

Place of the work : — Place of the Ms. : —

Size : 7.1" by 4.7" Extent : 3 foll.

Language : Sanskrit. Script : Devanāgarī

Remarks : —

श्रीः ॥ ततो द्वादशाहेऽह्नि नारायणबलिः कर्त्तव्यः ॥ तद्विधिः ॥
आचम्य प्राणानायम्य देशकालौ स्मृत्वा गोत्रस्य अस्म
त्पितुः बुद्धीनूत अमुका अमुकशर्मणः द्वादशाहेना
रायणबल्यारंभनिमित्तं विष्णोः षोडशभिरुपचारैर्म
हापूजां करिष्ये। इति संकल्प्य संपूज्य च ॥ प्रयोगपू
र्वकं स्वशाखाविधानेन लौकिकाग्निं संस्थाप्य महा
पूजां निवेदितशेषेण सि।द्धान्नपायसेन व्याहृतिभिः ।शिवः॥
॥वा। अतो देवेति षड्भिर्मंत्रैः षडाहुतीः पुरुषसूक्ते १
नच पूर्णाहुतिं च पायसं हुत्वा होमं समाप्य· द्वादशमंडले २

कलशमंत्रैः संस्थाप्य तत्र विष्णुं संस्थाप्य च· द्वादशसुद
लेषु द्वादशयतीन् साधून् गृहस्थान् विद्यावतो ब्राह्म
णान् केशवादि द्वादशनाम्नो विष्ण्वादि द्वादशनाम्नो वा
संस्थाप्य। एकं च विशिष्टं त्रयोदशं ब्राह्मणं महाविष्णु
बुध्या संस्थाप्य·। सर्वान् प्रत्येकं षोडशभिरुपचारैः
संपूज्य पायसान्नादिर्मैर्भिः संतर्प्य· यतिभ्यः कोपी
नानि गोपीचंदनानि दत्वा· महाविष्णुरूपाय ब्राह्म
णाय वस्त्रालंकारशय्यापददानादिभिः संपूज्य

तस्योच्छिष्टसंनिधौ न्यसेत् ... लेत्पूर्वमुखा
न्दर्भानास्तीर्य ॐ भूः स्वधा ॥ ॐ भुवः स्वधा ॥ ॐ स्वः
स्वधा ॥ इत्यवशिष्टपायसान्नेन त्रीन् बलीन् द
द्यात् ॥ ॥ मंत्रः ॥ नारायणं परं ब्रह्म तत्त्वं नारायणः
परं ॥ देवदत्त तया कश्चिद् ब्रह्मैव विकृतिं गतः ॥ पु
नर्ब्रह्मैव संप्राप्तो ब्रह्मवन्नन्द्यते ॥ ब्रह्मैकजा ।शिवः॥
यते स्तृष्टिः सर्वं ब्रह्म न विष्यति ॥ तस्मात् संसारिणः २
सर्वे ... ब्रह्मैवेति सुनिश्चितं । अव्यक्तं तत

तू स्ट १ नवे सृष्टं ब्रह्मैव विकृतां गतं ॥ यत्किंचित् दृश्यते लो
के तेन ब्रह्मैव दृश्यतं । एतान् मंत्रान् पठित्वा तु यतः
प्रणवपूर्वकान् ॥४॥ ॐ सर्वं ब्रह्मेत्युक्त्वा ॐ नमो ना
रायणायेति अष्टाक्षरमंत्रं जप्त्वा नमस्कृत्य सर्वे
उत्तिष्ठेयुः ॥ एवं यः कुरुते विद्वान् नारायणबलिं द्विजः ॥
विष्णुलोकमवाप्नोति पुरुषो नात्र संशयः ॥ ॐ ॥ ।शिवः॥
इति नारायणबलिविधानं यतेः ॥ ।शिवमस्तु सर्वजगतां ३
गतः । संवत् ७६ वर्षे माघवदि १० लिखितमनंतेन ॥ ॐ ॥